द्वादशः पाठः

# नीतिश्लोकाः

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥1॥

यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चिन्न तत्र दिवसं वसेत् ॥2॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥3॥

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥4॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥5॥

## शब्दार्थः

| | | |
|---|---|---|
| प्रियवाक्यप्रदानेन | = | प्रिय वचन बोलने से |
| तुष्यन्ति ( $\sqrt{\text{तुष्}}$ + लट्) | = | प्रसन्न होते हैं |
| जन्तवः ( जन्तु, प्रथमा, बहु० ) | = | सब प्राणी |
| तदेव ( तद् + एव ) | = | वही |
| वक्तव्यम् ( $\sqrt{\text{वच्}}$ + तव्यत्) | = | बोलना चाहिए |
| दरिद्रता | = | निर्धनता, कंजूसी |
| सम्मानः | = | आदर |
| प्रीतिः | = | प्रसन्नता |
| विद्यागमः ( विद्या + आगमः ) | = | ज्ञान की प्राप्ति, शिक्षा की व्यवस्था |
| वसेत् ( $\sqrt{\text{वस्}}$ + विधिलिङ्) | = | रहे, रहना चाहिए |
| काव्यशास्त्र-विनोदेन | = | काव्य और शास्त्र के विषय में चर्चा से |
| धीमताम् ( धीमत् + षष्ठी बहु० ) | = | बुद्धिमानों का |
| व्यसनेन | = | दुःख से / बुरे कार्य से |
| निद्रया ( निद्रा + तृतीया ) | = | नींद से / सोते हुए |
| कलहेन | = | झगड़ा / वाद-विवाद से |
| अलसस्य | = | आलसी का |
| कुतः | = | कहाँ से, कैसे |
| अविद्यस्य | = | विद्या से हीन व्यक्ति का |
| अधनस्य | = | धनहीन का |
| अमित्रस्य | = | मित्रों से रहित व्यक्ति का |
| श्रोत्रस्य | = | कान का |

## अभ्यासः

### मौखिकः

1. **पाठ में दिए गए श्लोकों को सस्वर गाएँ ।**

### लिखितः

2. मञ्जूषा से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें :–

| जन्तवः, धीमताम्, कलहेन, का |
|---|

(क) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति ............................... ।

(ख) तस्मात्तदेव वक्तव्यं वचने ............................ दरिद्रता ।

(ग) काव्यशास्त्रविनोदेन कालो गच्छति ......................... ।

(घ) व्यसनेन तु मूर्खाणां निद्रया .............................. वा ।

3. श्लोकों को जोड़ें :–

| (क) | (ख) |
|---|---|
| **(क) काव्यशास्त्रविनोदेन** | **(i) सर्वे तुष्यन्ति जन्तवः** |
| **(ख) हस्तस्य भूषणं दानं** | **(ii) कालो गच्छति धीमताम्** |
| **(ग) प्रियवाक्यप्रदानेन** | **(iii) न प्रीतिर्न च बान्धवाः** |
| **(घ) यस्मिन् देशे न सम्मानो** | **(iv) अविद्यस्य कुतो धनम्** |
| **(ङ) अलसस्य कुतो विद्या** | **(v) सत्यं कण्ठस्य भूषणम्** |

4. **उपयुक्त कथनों के सामने सही ✓ का तथा अनुपयुक्त कथनों के सामने गलत ✗ का चिह्न लगाएँ :–**

यथा– **प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति।** ✓

**मूर्खाणां कालः काव्यशास्त्रविनोदेन गच्छति।** ✗

(क) **दानं हस्तस्य भूषणम् ।** ☐

(ख) **सत्यं श्रोत्रस्य भूषणम् ।** ☐

(ग) **धीमतां कालः निद्रया गच्छति।** ☐

**(घ) यत्र सम्मानः तत्र वसेत्।** ☐

**(ङ) श्रोत्रस्य भूषणं शास्त्रम् ।** ☐

5. संस्कृत में अनुवाद करें :–

(क) राम घर जाता है ।

(ख) मोहन पुस्तक पढ़ता है ।

(ग) शीला पत्र लिखती है ।

(घ) राकेश फल खाता है ।

(ङ) मुकेश सत्य बोलता है ।

6. **उत्तराणि लिखत :–**

**(क) सर्वे जन्तवः केन तुष्यन्ति ?**

**(ख) कुत्र न वसेत् ?**

**(ग) धीमताम् कालः कथं गच्छति ?**

**(घ) मूर्खाणां कालः कथं गच्छति ?**

**(ङ) हस्तस्य भूषणं किम् ?**